## अध्याय :- १७ chapter-17

नारद उवाच ।।[१]

ततस्तयोः[२] समायोगः सैनयोरुभयोरभूत ।।
युगांते समनुप्राप्ते यथा क्षुब्ध समुद्रयोः ।। १

सुराऽसुराणां संमर्दे तस्मिन्परमदारुणे ।।
तुमुलं सुमहत्क्रांति सैनयोरुभयोरपि ।। २

गर्जतां देवदैत्यानां शंखभेरीरवेण च ।।
तूर्याणां चैव निर्घोषैर्मतंगानां च बृंहितैः ।। ३

हेषितै[३]र्हय वृंदानां रथनेमिस्वनेन च ।।
घोषेण च चैव तूर्याणां[४] युगांत इव चाभवत् ।। ४

रोषेणा[५]भिपरीतांगस्त्यक्तऽ जीवित चेतसः ।।
सम सज्जनुत तेन्योन्यं प्रक्रमेणाऽतिलोहिताः[६] ।। ५

रथारथैः समासक्ता गजाश्चापि महागजैः ।।
च पत्तयः पत्तिभिश्चैव हयाश्चापि महाहयैः ।। ६

ततः प्रासाशनिगदाभिंडिपालऽपरश्वधैः ।।
शक्तिभिः पट्टिशैः शूलैर्मुद्गरैः कणपैर्गुडैः ।। ७

---

१ ब. श्री नारद उ० ।

२ ब. स्तयो

३ अ. तां

४ अ. तूराणां

५ रेणाभि

६ अ. लुपाः

चक्रैश्च शक्तिभिश्चैव तोमरैरं कुशैरपि[1] ।।
कर्णिनालीकनारा च वत्सदंतार्द्धचंद्रकैः ।। ८

भल्लैर्वेतसपत्रैश्च शुकतुंडैश्च निर्मलैः ।।
वृष्टिभिश्चाद्भुताकारैर्गगनं समपद्यत ।। ९

संप्रच्छाद्य दिशः सर्वास्तमोमयमिवा भवत् ।।
प्राज्ञायंत[2] न तेऽन्योन्यं तस्मिंस्तमसि संकुले ।। १०

अदृश्य भूतास्तमसि न्यकृंतंत परस्परम् ।।
ततो भुजैर्ध्वजैश्छिन्नैः शिरोभिश्च सकुंडलैः ।। ११

गजैस्तुरंगैः पाद्यतैः पतद्भिः पतितैरपि ।।
आकाश शिरसी भ्रष्टैः पंकजैरिव भूश्चिता ।। १२

भग्नदंता भिन्नकुंभाश्छिन्न दीर्घ महाकराः ।।
~~मजाः शैलनिभाः पेतुर्भग्नाक्षाः शकलीकृताः ++~~
गजाः शैलनिभाः पेतुर्धरण्यां रुधिरस्रवाः ।। १३

भग्नेषाश्च रथाः पेतुर्भग्नाक्षाः शकलीकृताः ।।
पत्तयः कोटिशः पेतुस्तुरंगाश्च सहस्रशः ।। १४

---

१ ब. कुशीरपि

२ अ. अज्ञायंत

ततः शोणितनद्यश्च हर्षदाः पिशिताशिनाम् ।।
वैताला नंददादिन्यो व्यजायंत सहस्त्रशः ।। १५

तस्मिंस्तथाविधे युद्धे सेनानीर्ग्रसनो/रिहा ।।
बाणवर्षेण महता देवसैन्यम् कंपयत् ।। १६

ततो ग्रसनमालोक्य यमः क्रोधविमूर्छितः ।।
ववर्ष शरवर्षेण विशेषादग्निन वर्चसा ।। १७

सा विद्धो बहुभिर्बाणैर्ग्रसनो/हि पराक्रमः ।।
कृतप्रतिकृताकांक्षी धनुरानम्य[1] भैरवम् ।। १८

२ * शरैः सहस्त्रैश्च पंचलक्षैश्चैव व्यताडयत् ।।
ग्रसनेन विमुक्तांस्ता>छरान्सोपि निवार्य च ।। १९

बाणवृष्टिभिरुग्राभिर्यमो ऽ ग्रसनमर्दयत् ।।
कृतांत शरवृष्टिनां संततीः[3] प्रतिसर्पतीः ।।
चिच्छेद शरवर्षेण ग्रसनो दानवेश्वरः ।। २०

विफलां तां समालोक्य यमः स्वशरसंततिम् ।। २१

---

१ अ. धनुरायम्य

* २ अ. "शतैः पंच सहस्त्रैश्च" इति स्यात् ।

३ अ. ब. संततिं

प्राहिणोन्मुद्गरं दीप्तं ग्रसनस्य रथं प्रति ।।
स तं मुद्गरमायांतमुत्पत्य रथसत्तमात् ।। २२

जग्राह वामहस्तेन लीलया ग्रसनोऽरिहा ।।
तेनैव मुद्गरेणाथ यमस्य महिषं रुषा ।। २३

ताडयामास वेगेन स पपात महीतले ।।
उत्पत्याथ यमस्तस्मान्महिषान्निपतिष्यतः ।। २४

प्रासेन ताडयामास ग्रसनं वदने दृढम् ।।
स तु प्राप्तप्रहारेण मूर्छितो न्यपतद्भुवि ।। २५

ग्रसनं पतितं दृष्ट्वा जंभो भीमपराक्रमः ।।
यमस्य भिंडिपालेन[1] प्रहारमकरोद्धृदि ।। २६

यमस्तेन प्रहारेण सुस्राव रुधिरं मुखात् ।।
अतिगाढप्रहारार्त्तः कृतांतो मूर्छितोऽभवत् ।। २७

कृतांतमर्दितं दृष्ट्वा गदा[2]पाणिर्धनाधिपः ।।
वृतो यक्षायुतैर्गणैर्जंभं प्रत्युद्ययौ रुषा ।। २८

---

१ अ. .....मालेन । ब. पिंड मालेन ।
२ ब. गद.....

जंभो रुषा तमायांतं दानवानीकसंवृतः ।।
जग्राह वाक्यं राक्षस्तु यथा स्त्रिगृधिन भाषितम् ।। २९

ग्रसनो लब्ध संज्ञो/थ कमस्य प्रदहिणोद्गदाम् ।।
मणिहैम परिष्कारां गुर्वीं परिधमर्दिनीम्[1] ।। ३०

तामापतंतीं संप्रेक्ष्य गदां महषिवाहनः ।।
गदायाः[2] प्रतिघातार्थं जगज्जुवलन भैरवम् ।। ३१

दंड मुमोच कोपेन ज्वालामाला समाकुलम् ।।
स गदां वियति प्राप्य रक्षासां बुधरोद्धतम् ।। ३२

संघट्टाश्रीभवत्ताभ्यां शैलाभ्या[3]मिव दुःसहः ।।
ताभ्यां निष्पेषानिह्नाद जडीकृत दिगंतरम् ।। ३३

जगद्व्याकुलतां यातं प्रलयागम शंकया ।।
क्षणात्प्रशांत निह्र्गदं ज्वलदुलका समाचितम् ।। ३४

निष्पेषाणां तयोर्भिमम भूद्गमन * गोचरम् ।।
निहत्याथ गदां दण्डस्ततो ग्रसनमूर्धनि ।। ३५

---

१ अ. परिधमर्दिनी ।
२ ब. गदयाः
३ अ. .....मति

पपात पौरुषं हत्वा यथा दैवं पुरार्जितम् ।।
स तु तेन प्रहारेण दृष्ट्वा सतिमिरादिशः ।। ३६

पपात भूमौ निःसंज्ञो भूमिरेणु विभूषितः ।।
ततो हाहारवो घोरः सैन्ययोरुभयोरभूत् ।। ३७

ततो[१] मुहुर्तमात्रेण [२]ग्रसनः प्राप्य चेतनाम्[३] ।।
अपश्यत्स्वां[४] तनुं ध्वस्तां विलोलाभरणांबराम् ।। ३८

सचापि चिंतयामास कृतप्रतिकृत क्रियाम् ।।
धिगस्तु पौरुषं मह्यं प्रभोरग्रेसरः कथम् ।। ३९

मच्छ्राश्रितानि सैन्यानि जिते मयि जितानी च ।।
असंभावितरूपो हि सज्जनो[५] मोदते सुखम् ।। ४०

संभावितस्त्व शक्तश्चेत्तस्य नायं परो पिवा ।।
एवं संचित्य वेगेन समुत्तस्थौ महाबलः ।। ४१

मुद्गरं कालदण्डाभं गृहीत्वा गिरिसंनिभम् ।।
ग्रसनो घोरसंकल्पः संदृष्टौष्ठपुटच्छदः ।। ४२

---

१ अ. प्रती नास्ति
२ अ. पुनःग्रसनः
३ ब. चेतनं
४ ब. अपश्यत्, मुद्रित पुस्तके "स्वां" अधिकः पाठः ।
५ ब. सजनो

रथेन त्वरितो[1]गच्छदाससादांतकं रणे ।।
समासाद्य यमं युद्धे ग्रसनो भ्राम्य मुद्गरम् ।। ४३

वेगेन महता रौद्रं चिक्षेप यममूर्धनि ।।
विलोक्य मुद्गरं दीप्तं यमः संभ्रांतलोचनः ।। ४४

वंचयामास दुर्द्धर्षं मुद्गरं तं महाबलैः ।।
तस्मिन्नप्रसृते दूरं चंडानां भीम कर्मणाम् ।। ४५

याम्यानां किंकराणां च अयुतं निष्पिपेपहा[2] ।।
ततस्तदयुतं दृष्ट्वा हतं किंकरवाहीनी ।। ४६

दशार्बुदमिता क्रुद्धा ग्रसनायान्वधावत ।।
ग्रसनस्तु समालोक्य तां किंकरमयां शुभाम्[3] ।। ४७

मेने यम सहस्त्राणि ताद्द[4]ग्रूपबला हि सा ।।
विगाह्य ग्रसनां सैना ववर्ष शरवृष्टिभिः ।। ४८

कल्पांत घोर संकाशो बभूव स महारणः ।।
केचिच्छैलेन बिभिदुः केचिद्बाणैरजिह्नगैः ।। ४९

---

१ अ. गच्छन्नास
२ ब. निः पिपेष्ाह
३ अ. सभां
४ अ ..... कूरु पबला

पिपिष्टुर्गदया केचित्केचिन्मुद्गरवृष्टिभिः ।।
केचित्प्रासप्रहारैश्च [1]ताडयामासुरुद्धताः ।। ५०

अपरे किंकरास्तस्य ललंबुर्बाहुमंडले ।।
शिला[2]भिरपरे जघ्नुर्द्रुमैरन्ये महोच्छ्रयैः ।। ५१

तस्यापरे च गात्रेषु दशनांश्च न्यपातयन् ।।
अपरे मुष्टिभिः पृष्ठे किंकरास्ताडयंति च ।। ५२

एवं चाभिद्रुतस्तैः स ग्रंसनः क्रोधमूर्छितः ।।
उत्साद्यगात्रं भूपृष्ठे[3] निष्पिपेषा[4] सहस्त्रशः[5] ।। ५३

~~कांश्चित्स्थाय जघ्ने-सौ धावन्नन्यान चूर्णयत् ।।~~
कांश्चित्स्थाय जघ्ने/सौ मृष्टिभिः किंकरान्न् रणे ।।
कांश्चित्पाद प्रहारेण धावन्नन्यान चूर्णयत् ।। ५४

क्षणैकेन स तान्निन्ये यमलोकाय भारत ।।
स च किंकरयुद्धेन ववृधे/ग्निरिवैधसा ।। ५५

तमालोक्य यमो[6]श्रांतं श्रांतांस्तांश्च हतान्स्वकान् ।।
आजगाम समुद्यम्य दंडं महिषवाहनः ।। ५६

---

१ अ. ब. "दारुणैस्ताडितः स च" इतिस्यात् ।
२ ब. शिरी
३ अ. भूपृष्टे
४ ब. निपिपेशः
५ अ. सहस्त्रः
६ ब. यमः

ग्रसनस्तु तमायां तमाजघ्ने गदयोरसि ।।
अचिंतयित्वा तत्कर्म ग्रसनस्यां तकोऽरिहा ।। ५७

व्याघ्रान्दंडेन संजघ्ने स रथान्नय पतद्भूवि ।।
ततः क्षणेन चोत्थाय संचिंत्यात्मानमुद्धतः ।। ५८

वायुवेगेन सहसा ययौ यमरथं प्रति ।।
पदातिः स रथं तं च समारुह्य यमं तदा ।। ५९

योध्यामास[१] बाहुभ्यामाकृष्य बलिनां वरः ।।
यमोऽपि शस्त्राण्युत्सृज्य बाहुयुद्धे प्रवर्तते ।। ६०

ग्रंसनं[२] कटिवस्त्रे तु यमं गुह्य बलोत्कटः ।।
भ्रामयामास वेगेन संभ्रमाविष्टचेतसम्[३] ।। ६१

विमोच्याथ यमः कष्टात्कंठेऽवष्टभ्य चासुरम् ।।
बाहुभ्यां भ्रामयामास सोऽप्यात्मानमनोचयत् ।। ६२

ततो जघ्नतुरन्योयं मुष्टिभिर्निर्दयो च तौ ।
दैत्येन्द्रस्याति वीर्यत्वात्परिश्रांततरो यमः ।। ६३

---

१ अ. योधयामास
२ अ. ब. ग्रसनः
३ अ. मानसं ।।

स्कंधे निधाय दैत्यस्य मुखं विश्रांति[1] मैच्छत ।।
तमा लक्ष्य ततो दैत्यः श्रांतमुत्पाप्य चौजसा ।। ६४

निष्पिपेष्ठा महीपृष्ठे विनिघ्नन्पार्ष्णिपाणिभिः ।।
ततो यमस्य वदनात्सुस्त्राव रुधिरं बहु ।। ६५

निर्जीवमिति तं दृष्ट्वा ततः संत्यज्य दानवः ।।
जयं प्राप्योद्धतं नादं मुक्त्वा[2] संत्रास्य देवताः ।। ६६

स्वकं सैन्यं समासाद्य तस्थौ गिरिरिवाचलः[3] ।। ६७

नादेन तस्य ग्रसनस्य संख्ये महायुद्धैश्रा(श्रा)र्दित सर्वगात्राः ।।
गते कृतांते वसुधां च निष्प्रभे चंकपिरे कांदिशिकाःसुरास्ते।। ६८

[4] इति श्री स्कांदे महापुराण..... तारकसैन्य देवसैन्ययोर्मध्ये यमग्रसनयोर्युद्ध वर्णनं नाम सप्तदशोऽध्यायः ।।१७।।

---

१ अ. विश्रांतु.....
२ ब. मुक्त्व
३ ब. गिरवाचलः
४ अ. इति श्री स्कंदपुराणे देवासुर युद्धे यम पराजयो नाम ।
ब. इति श्री स्कंद पुराणे कुमारिकाखंडे सप्तदशोऽध्यायः।।१७।।